Homas
the spiritual way to success
K. Krishna Prasad Bhat
Website: http://homas.in
Email: homasonline@gmail.com
Mobil: 8000858858 /9940406777

# अथ सप्तविंशः पटलः ॥

अथ शारदातिलकोक्तमृत्युञ्जयत्र्यक्षरीविधानमुच्यते —

मन्त्रश्च होमादिद्रव्यं च पूर्ववदेव। तेन हेतुना विस्तरेण नोक्तम्।

मन्त्रोद्धार उच्यते —

तारस्थिरासकण्ठेन्दुभृगुसर्गविभूषितः ।
त्र्यक्षरात्मा निगदितो मन्त्रो मृत्युञ्जयाह्वयः ॥

ऋषिः कहोळो देव्यादिगायत्री छन्द ईरितः ।
मृत्युञ्जयो महादेवो देवतास्य महामनोः ॥

भृगुणा दीर्घयुक्तेन षडङ्गानि समाचरेत् ।

ध्यानम् —

चन्द्रार्काग्निविलोचनं स्मितमुखं पद्मद्वयान्तस्थितं
मुद्रापाशमृगाक्षसूत्रविलसत्पाणिं हिमांशुप्रभम् ।
कोटीरेन्दुगळत्सुधाप्लुततनुं हारादिभूषोज्ज्वलं
कान्त्या विश्वविमोहनं पशुपतिं मृत्युञ्जयं भावये ॥

गुणलक्षं जपेन्मन्त्रं तद्दशांशं प्रसन्नधीः ।
जुहुयादमृताकाण्डैः शुद्धदुग्धाज्यलोळितैः ॥

शैवे संपूजयेत्पीठे मूर्तिं मूलेन कल्पयेत् ।
अङ्गावरणमाराध्य पश्चाल्लोकेश्वरान्यजेत् ॥

तदस्त्राणि ततो बाह्ये पूजयेत्साधकोत्तमः ।
जपः पूजादिकः सिद्धे मन्त्रेऽस्मिन्मनुनाऽमुना ॥

कुर्यात्प्रयोगान्कल्पोक्तानभीष्टफलसिद्धये ।
दुग्धसिक्तैस्सुधाखण्डैः मन्त्री मासं सहस्रकम् ॥

आराधितेग्नौ विधिवज्जुहुयाद्विजितेन्द्रियः ।
सन्तुष्टश्शङ्करस्तेन सुधाप्लावितविग्रहः ॥

आयुरारोग्यसंपत्तियशः पुत्रान् प्रवर्तयेत् ।
सुधावटौ तिला दूर्वाः पयस्सर्पिः पयोहविः ॥

इत्युक्तैस्सप्तभिर्द्रव्यैर्जुहुयात्सप्तवासरम् ।
क्रमाद्दशशतं नित्यमष्टोत्तरमतन्द्रितः ॥

सप्ताधिकद्विजान्नित्यं भोजयेन्मधुरान्वितम् ।
विकारानुगुणं मन्त्री वर्धयेद्धोमवासरान् ॥

होतृभ्यो दक्षिणां दद्यात्तरुणा गाः पयस्विनीः ।
गुरुं संप्रीणयेत्पश्चात् धनाद्यैर्देवताधिया ॥

अनेन विधिना साध्यः कृत्यारोगग्रहादिभिः ।
विनिर्मुक्तश्चिरं जीवेच्छरदां शतमञ्जसा ॥

आभिचारे ज्वरे तीव्रे रोगोन्मादे शिरोगदे ।
असाध्यरोगे क्ष्वेळार्तौ मोहे दाहे तथाऽऽमये ॥

होमोयं शान्तिदः प्रोक्तः सर्वसंपत्प्रदायकः ।
द्रव्यैरेतैः प्रजुहुयात् त्रिजन्मसु यथाविधि ॥

भोजयेन्मधुरैर्भोज्यैः ब्राह्मणान्वेदपारगान् ।
दीर्घमायुरवाप्नोति वाञ्छितां विन्दति श्रियम् ॥

एकादशाहुतीर्नित्य जुहुयात्साधु दूर्वया ।
अपमृत्युजिदेतत्स्यादायुरारोग्यवर्धनम् ॥

त्रिजन्मसु सुधावल्लीकाश्मीरमधुरोद्भवैः ।
समिद्भिः कृतो होमः सर्वमृत्युगदापहः ॥

काश्मीरं-कुंकुमम् । मधुरसमित्-अतिमधुरम् ।

सिद्धार्थैर्विहितो होमो महाज्वरविनाशनः ।
अपामार्गसमिद्धोमः सर्वामयनिषूदनः ॥

प्रणवरचितनाळं मन्त्रमध्यार्णपत्रं
भृगुविलसितमध्यं पत्रयुग्मं तदन्तः ।
कृतवसतिमुमेशं वर्णनिर्यत्सुधार्द्रं
कलयतु हृदि नित्यं सर्वदुःखप्रशान्त्यै ॥

यन्त्राढ्ये कलशे सौम्ये कलशप्रोक्तवर्त्मना ।
नवरत्नसमायुक्तं दुकूलाभ्यामलंकृतम् ॥

आपूर्य सलिलैश्शुद्धैस्तस्मिन्देवं प्रपूजयेत् ।
उपचारैष्षोडशभिर्विधानेन विधानवित् ॥

अभिषिञ्चेत्प्रियं साध्यं विनीतं दत्तदक्षिणम् ।
आधिव्याधिमहारोगकृत्याद्रोहनिकृन्तनम् ॥

अभिषेकोऽयमाख्यातः कीर्तिश्रीविजयप्रदः ।

मध्ये साध्याक्षराढ्यं प्रणवमपि लिखेन्मध्यमं दिग्दळस्थं
कोणेष्वन्त्यं मनोस्तत्क्षितिभवनमथो दिक्षु चन्द्रं विदिक्षु ।
टान्तं यन्त्रं तदुक्तं सकलविषरिपुक्ष्वेलभूतापमृत्यु-
व्याधिव्यामोहदुःखप्रशमनमुदितं श्रीप्रदं कामदं च ॥

अयमर्थः — मन्त्रस्य मध्यमाक्षरं दिक्षु, अन्त्याक्षरं कोणदळेषु, चतुरश्रस्य दिक्षु ठं इति विलिखेत् ॥

अथ कल्पान्तरोक्तं यन्त्रं लिख्यते—

मध्ये सार्णविदर्भितं प्रपुटितं मृत्युञ्जयत्र्यक्षरैः
क्षान्तस्थं निजसाध्यनाम विलिखेत् किञ्जल्कसंस्थान्स्वरान् ।
पत्रेष्वष्टसु नामवर्णपुटितं वर्गांस्तदग्रेष्वथो
यन्त्रं पद्मपुटीकृतं निगदितं मृत्युञ्जयाख्यं परम् ॥

कर्णिकामध्यस्थजीवस्य परितः मन्त्रपुटितमातृकार्णान् विलिख्य, तस्य क्षकारस्यान्तः साध्यनाम विलिखेत्। अष्टदळेषु साध्यनामपुटितं त्र्यक्षरं कादिवर्गान् दळाग्रेष्वित्यर्थः। इदमपि मृत्युञ्जययन्त्रम्। इति शारदातिलकोक्त-मृत्युञ्जयकल्पस्समाप्तः ॥